नं. | | | | | | | |

मुद्रित पृष्ठों की संख्या : 6

28

228 (HWG)

# 2017

# संस्कृतम्

(केवल प्रश्नपत्रम्)

अवधि : होरात्रयम् ] [ पूर्णांक : 100

निर्देश : (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।
(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(vi) खण्डसंख्या अपि लेखनीया।

## खण्ड – 'क' ( अपठितांश–अवबोधनम् )

अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

उत्तराखण्डे समये–समये अनेके महापुरुषाः अभवन्। तेषु पं. गोविन्दवल्लभ पन्त महोदयः अग्रणीयः अस्ति। सः प्रख्यातः राजनीतिज्ञः, कुशलवक्ता, संसदीयप्रथायाः मर्मज्ञश्च आसीत्। सः 1887 तमे खीष्टाब्दे सितम्बर मासस्य दशमे दिनाङ्के अल्मोड़ा जनपदस्य खूँट ग्रामे जन्म अलभत्। प्रारम्भिकी शिक्षा अल्मोड़ा नगरे प्राप्य सः उच्चशिक्षार्थं प्रयागनगरम् अगच्छत्। आंग्लशासकानाम् विरुद्धः सः 'कुमाऊँ परिषद्' संस्थायाः स्थापनाम् अकरोत्।

(क) एक पदेन उत्तरं लिखत– 1×2 = 2
  (i) उत्तराखण्डे समये–समये के अभवन् ?
  (ii) पन्त महाभागस्य प्रारम्भिकी शिक्षा कुत्र अभवत् ?

(ख) पूर्ण वाक्येन उत्तरत– 1
  (i) आंग्लशासकानां विरुद्धः सः कस्याः स्थापनाम् अकरोत् ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2
  (i) 'प्रख्यातः राजनीतिज्ञः' अत्र विशेषण पदं किम् ?
  (ii) 'सः उच्चशिक्षार्थम् प्रयागनगरम् अगच्छत्।' अत्र क्रियापदं किम् ?

अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

महान् वैज्ञानिकः डॉ. जगदीश चन्द्र 'बसु' महाभागः विज्ञानक्षेत्रे प्रायः अभिनवप्रयोगं करोति स्म। 'बेतार' यन्त्रस्य आविष्कारः अनेनैव कृतः। यस्य श्रेयः 'मारकोनी' महाशयः अलभत्। विविध–प्रयोगान् कृत्वा तेन प्रदर्शितं यत् जीव जन्तूनिव वृक्षेष्वपि जीवनीशक्तिः वर्तते। एतेन प्रत्यक्षं प्रकृटीकृतं यद् येन विषेण दर्दुरः म्रियते तेनैव विषेण वृक्षोऽपि म्रियते। यथा औषधि–विशेषेण मनुष्यः रोगमुक्तः भवति, तथैव वृक्षोऽपि रोगमुक्तः भवति। यथा मनुष्ये पाचनक्रिया भवति, तथैव वृक्षेष्वपि खाद्यरसानां परिपाकः पुष्टिश्च भवति। एवमेव स्वजीवनकाले विविधान् आविष्कारान् कृत्वा 'वसु' महाभागः वैदेशिकान् अपि आश्चर्यचकितम् अकरोत्। यद्यपि 'वसु' महाभागः अस्माकं मध्ये नास्ति किन्तु तस्य कार्याणि अद्यापि प्रेरणास्पदानि सन्ति।



Downloaded from cclchapter.com

(क) एक पदेन प्रश्नानां उत्तराणि लिखत–

(i) विज्ञानक्षेत्रे प्रायः कः अभिनवप्रयोगं करोति स्म ?

(ii) जीवजन्तूनिव केषु जीवनीशक्तिः वर्तते ?

(ख) पूर्णवाक्येन उत्तरत–

(i) कस्य श्रेयः 'मारकोनी' महाशयः अलभत् ?

(ii) 'वसु' महाभागः कान् आश्चर्यचकितम् अकरोत् ?

(ग) यथानिर्देशम् उत्तरत–

(i) 'तथैव' इति पदे सन्धि विच्छेदं कुरुत ?

(ii) 'यद्यपि 'वसु' महाभागः अस्माकं मध्ये नास्ति।' अस्मिन् वाक्ये कर्तृपदं लिखत ?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

## खण्ड – 'ख' ( रचनात्मकं लेखनम् )

3. शोभितः पिथौरागढ़ नगरे निवसति। तस्य मित्रम् उत्कर्षः देहरादून–नगरे अस्ति। सः स्वविद्यालये संस्कृत समारोहे संस्कृतनाटक प्रतियोगितायां प्रथमं स्थानं प्राप्तवान्। तं प्रति लिखितं वर्धापन–पत्रं मञ्जूषायां प्रद पूरयित्वा उत्तरपुस्तिकायां लिखत– 1

पिथौ

दिनाङ्कः 04–09

प्रिय मित्र (i) ..................

नमो नमः।

भवतां पत्रम् अद्यैव प्राप्तम्। पत्रं पठित्वा मनः (ii) .................. जातः। भवान् स्वविद्यालये आयोजितायां संस्कृ प्रतियोगितायां प्रथमं स्थानं (iii) ............... । भवतां संस्कृतानुरागः प्रशंसनीयः। मत्पक्षतः (iv) ............... वर्धा

भवतां प्रि

(v) .....

| मञ्जूषा – प्राप्तवान्, उत्कर्ष, प्रफुल्लितः, कोटिशः, शोभितः |
|---|

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत– 1

गुरुः – किं त्वं .................. अद्य का तिथिः ?

शिष्यः – श्रीमन् ! अद्य .................. पूर्णिमा तिथिः।

गुरुः – .................. दिने कः महोत्सवः भवति ?

शिष्यः – श्रीमन् ! अस्मिन् दिने रक्षाबन्धनं .................. ।

गुरुः – अस्मिन्नेव दिने .................. अपि आयोज्यते।

| मञ्जूषा – संस्कृत–दिवस, अस्मिन्, श्रावणमासस्य, भवति, जानासि |
|---|

5. 'अस्माकं देशः' इति विषयम् अधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं लिखत। सहायतार्थम् अधः मञ्जूषा दत्ता– 2×

| मञ्जूषा – राजधानी, उत्तरस्याम्, संसदभवनम्, राष्ट्रपतिः, प्रवहन्ति, भारतवर्षम्, मुकुटमणिः, प्रक्षालयति |
|---|



Downloaded from cclchapter.com

## खण्ड – 'ग' ( अनुप्रयुक्त व्याकरणम् )

6. अधोलिखितेषु रेखांकित पदेषु सन्धिं/सन्धि विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3 = 3

(क) एतत् + श्रुत्वा सः स्वगृहम् अगच्छत्।

(ख) अतिदीर्घः प्रवासोऽयम्।

(ग) श्रावणमासे जनाः शिवालयं गच्छन्ति।

7. रेखांकित पदेषु समासं/समास विग्रहं कृत्वा लिखत– 1×4 = 4

(क) त्वया विद्यायाः अभ्यासः करणीयः।

(ख) सायंकाले सः प्रतिदिनम् भ्रमणार्थं गच्छति।

(ग) छात्राः कक्षायाम् अष्टाध्यायीं स्मरन्ति।

(घ) रामः च लक्ष्मणः च विश्वामित्रस्य शिष्यौ आस्ताम्।

8. रेखांकितपदेषु प्रकृति–प्रत्ययौ संयोज्य वाक्यानि उत्तर पुस्तिकायां लिखत– 1×5 = 5

(क) उत्तराखण्डे अनेकानि दृश् + अनीयर् स्थानानि सन्ति।

(ख) बालिका गीतं गै + शतृ विद्यालयं गच्छति।

(ग) प्रकृतेः रमणीय + तल् पश्य।

(घ) अहिंसकः एव धर्म + ठक् भवति।

(ङ) गायक + टाप् मधुरं गीतं गायति।

9. मञ्जूषायाः सहायतया निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत– 1×5 = 5

(क) ..................... कार्यम् न करणीयम्।

(ख) वृक्षेषु वानराः ..................... कूर्दन्ति।

(ग) मम भ्राता ..................... आगमिष्यति।

(घ) ..................... दशरथो नाम राजा बभूव।

(ङ) वने सिंहाः ..................... गर्जन्ति।

| मञ्जूषा – | उच्चैः, | सहसा, | पुरा, | इतस्ततः, | श्वः |
|---|---|---|---|---|---|

10. अधोलिखित वाक्यानां वाच्य परिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3 = 3

(क) बालकः स्व कार्यं करोति।

(ख) त्वया नाटकं दृश्यते।

(ग) बालिकाः गीतं गायन्ति।



Downloaded from cclchapter.com

11. घटिकां दृष्ट्वा शब्देषु लिखत, रमेशः कदा किं करोति– 1×4




अपराह्न 3.45 बजे    अपराह्न 4.30 बजे    सायम् 7.15 बजे    रात्रि 10.00 बजे

(क) रमेशः अपराह्ने ............... वादने विद्यालयात् गृहम् आगच्छति।

(ख) सः अपराह्ने .............. वादने क्रीडनाय गच्छति।

(ग) सः सायं .............. वादने स्वाध्यायं गृहकार्यं च करोति।

(घ) रमेशः रात्रौ .............. वादने शयनाय गच्छति।

12. अधोलिखित वाक्ये अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्तिं संस्कृतेन कृत्वा पुनः उत्तर पुस्तिका लिखत– 1×2

(क) उद्याने (40) ................ अश्वत्थ वृक्षाः सन्ति।

(ख) संवत्सरे (12) ................ मासाः भवन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत– 1×4

(क) किम् अद्य त्वं विद्यालयं न <u>गमिष्यति</u> ?

(ख) <u>छात्राः</u> विद्यालयस्य क्रीडांगणे क्रीडति।

(ग) मम उद्याने <u>अनेकाः</u> पुष्पाणि विकसन्ति।

(घ) श्वः अहं दिल्लीनगरम् <u>आगच्छम्</u>।

## खण्ड – 'घ' ( पठित अवबोधनम् )

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत–

अथापरेद्युः राज्ञो राजधानीं प्रति प्रस्थानोत्सुकस्य पुरतः कश्चित् शस्त्राहतः श्रमक्लान्तः पुरुषः आश्रममागतः। तस्य कष्टं विलोक्य दयार्द्रो मुनिर्यथासाध्यं तस्योपचारे प्रवृत्तः। राजापि तादृशस्य आतुरस्य दशया विकल इव मुनेस्तस्मिन् कार्ये तदादेशेन सहायतां चकार। कतिपयैरेव दिवसैरागन्तुको मुनेः राज्ञश्चोपचारेण स्वस्थो जातः।

(क) एक पदेन उत्तरत–

(i) कीदृशः पुरुषः आश्रममागतः ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) तस्य कष्टं विलोक्य दयार्द्रो मुनिः किम् अकरोत् ?

(ii) आगन्तुकः पुरुषः कथं स्वस्थो जातः ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'शस्त्राहस्तः पुरुषः' अत्र विशेष्य पदं किम् ?

(ii) 'तस्योपचारे' अस्मिन् पदे सन्धि–विच्छेदं कुरुत।



Downloaded from cclchapter.com

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयताम् –
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

(क) एकपदेन उत्तरत– 1

(i) अम्भोदाः कुत्र सन्ति ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) केचिद् वृष्टिभिः काम् आर्द्रयन्ति ?

(ii) कीदृशं वचनं मा ब्रूहि ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'मेघाः' अस्य समानार्थिपदं श्लोकात् चित्वा लिखत।

(ii) 'नैतादृशाः' अस्मिन् पदे सन्धि–विच्छेदं कुरुत।

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत–

रामः – एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि–क्षत्रियकुलपितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता ?

लव – भगवन् सहस्रदीधितिः।

रामः – कथमस्मत्समानाभिजनौ संवृत्तौ ?

विदूषकः – किं द्वयोरप्येकमेव प्रतिवचनम् ?

लवः – भ्रातरावावां सोदर्यौ।

रामः – समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः – आवाम् यमलौ।

रामः – सम्प्रति युज्यते। किं नामधेयम् ?

(क) एक पदेन उत्तरत– 1

(i) लवकुशयोः वंशस्य कर्ता कः ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) लवकुशौ रामः किं पृच्छति ?

(ii) अत्र यमलौ कौ ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'सूर्यः' अस्य पर्यायवाचिपदं नाट्यांशात् चित्वा लिखत।

(ii) 'आवाम् यमलौ' अत्र आवाम् सर्वनाम–पदं कस्मै प्रयुक्तम्।

17. अधोलिखित–श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत–

(क) सर्वेष्वृतुष्वहरहः पुम्भिरात्महितैषिभिः।
बलस्यार्धेन कर्तव्यो व्यायामो हन्त्यतोऽन्यथा ।। 1×3 = 3

(i) ये मनुष्याः ................ इच्छन्ति।

(ii) तैः ................ अर्धबलेन व्यायामः करणीयः।

(iii) अन्यथा हानिकारकः ..............।



Downloaded from cclchapter.com

(ख) एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना ।। 1×3

(i) एकेन राजहंसेन ................ यादृशी ................ भवति।

(ii) तादृशी सरोवरं परितः तटे निवसता ................ न भवति।

18. अधोलिखित–श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत–

(क) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ।। ½×3 =

**यथा–**

एक एव मानी (i) ................ खगः वने वसति (ii) ................ म्रियते वा (iii) ..........
याचते वा।

(ख) न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात् ।। ½×3 =

**यथा–**

तेन सदृशं (i) ..................... च किञ्चित् न अस्ति। (ii) ..................... च व्यायामिनं मत
(iii) ................ न अर्दयन्ति।

19. रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत– 1×4

(क) भृङ्गाः रसालमुकुलानि समाश्रयन्ते।

(ख) शरीरस्य आयास जननं कर्म व्यायामः इति कथ

(ग) तत्र राजसिंहो नाम राजपुत्रः वसति स्म।

(घ) एतादृशी भयावह–घटना गढ़वालक्षेत्रे घटिता।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत– ½×8 =

(i) अथ सा कन्या धात्रीमुखेनातिथिं स्नानाय प्रेरितवती।

(ii) विक्रीतैरङ्गारैर्यत् मूल्यं लब्धं तेन शाकं धृतं दधि तैलं चिञ्चाफलं च क्रीतम्।

(iii) तस्याम् अनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नाम आसीत्।

(iv) एवं कन्यागुणसम्पदा समाकृष्टः शक्तिकुमारस्तां विधिवदुपयम्य नीतवान्।

(v) अस्ति द्रविणेषु काञ्ची नाम नगरी।

(vi) एकदा सः कावेरी तीरपत्तने विगलितसमृद्धिं विरलभूषणां कुमारीमपश्यत्।

(vii) ततस्तान् सुरभीन् शालीनातपे किञ्चिद् विशोष्य मुहुर्मुहुः परिवर्त्य समायां भूमौ अघट्टयत्।

(viii) पेयोपहारपूर्वं भोजनं धृतसहितोदनं व्यञ्जनं च तस्मै दत्तवती।

21. संस्कृतेन वाक्यप्रयोगं कुरुत– 1×3 =

(क) इदानीम् (ख) प्रक्षाल्य (ग) पिकः

*********



Downloaded from cclchapter.com